दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-7

1 अक्तूबर, 29 2025

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लाष्टमी
कार्तिक १३ प्रविष्टांशः मङ्गलमयः भवेत्


2 हिमाचलप्रदेशस्य मुख्यमन्त्रिणा सुखविन्द्रसिंहेन उक्तम् सी.बी.एस.ई. विद्यालयानां अध्यापकानां पृथक् संवर्गः भविष्यति

3 हिमाचलस्य महिलाः प्रधानमंत्री उज्ज्वलायोजनायाः लाभं लब्धुं शक्नुवन्ति, यतः केन्द्रसर्वकारेण राज्ये योजनायाः पुनः आरम्भः कृतः

5 नीति- आयोगेन भारतस्य सेवाक्षेत्रस्य विषये प्रकाशितौ द्वौ प्रतिवेदनौ


## केन्द्रीयमन्त्रिमण्डलेन अष्टमस्य केन्द्रीयवेतन-आयोगस्य सन्दर्भ-नियमाः अनुमोदिताः




**हिमसंस्कृतवार्ताः** - केन्द्रीय-मन्त्रिमण्डलेन अष्टमस्य केन्द्रीयवेतनआयोगस्य कार्यक्षेत्रस्य अनुमोदनं कृतम्। नवदेहल्यां मन्त्रिमण्डलसभायाः अनन्तरं वार्ताहरान् ज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् आयोगः विधान तिथितः अष्टादश मासेषु स्वस्य अनुशंसाः प्रस्तोष्यति। सः सूचितवान् यत् आयोगे एकः अध्यक्षः, एकः अंशकालिकः सदस्यः, एकः सचिवः च भविष्यन्ति।

### राजधान्याम् देहल्यां प्रदूषणम् निवारयितुं कृत्रिमवृष्टिः कार्यते

**हिमसंस्कृतवार्ताः** - राजधान्याम् देहल्यां प्रदूषणम् निवारयितुं कृत्रिमवृष्टिः कार्यते। पर्यावरणमन्त्री मञ्जिन्दरसिंह सिरसा उक्तवान् चतुर्षु होरासु अनेकेषु क्षेत्रेषु वर्षा भवितुं शक्नोति।

## संयुक्तराज्यामेरिकादेशे सप्तविंशति दिवसानां सर्वकारीय वित्तकार्यावरोधेण विमानयात्रा निरन्तरं बाधितास्ति

**हिमसंस्कृतवार्ताः**।संयुक्तराज्यामेरिका-देशे सप्तविंशति दिवसानां सर्वकारीय वित्तकार्यावरोधेण विमानयात्रा निरन्तरं बाधितास्ति। चतुः सहस्रतोप्यधिकानि विमानयानानि विलम्बेन प्रचलन्ति, प्रायः अष्टादशाधिकैकशतम यावत् अतिरिक्तानि विमानयानानि निरस्ती-कृतानि। राष्ट्रव्यापि-विमानस्थानकेषु, वायुयान-यातायातनियन्त्रण-स्थलेषु च आवश्यक-कर्मचारिणम् अभावेन विलम्बः भवति। प्रायः त्रयोदशसहस्राणि यावत् वायुयान-यातायात नियन्त्रकाः, पञ्चाशत्-सहस्राणि यावत् परिवहन-सुरक्षा-प्रशासन-अधिकारिणः च मासिकस्य देयराशिं विनैव कार्यं कुर्वन्ति। यस्य परिणामेन व्यापकरूपेण परिचालन- समाह्वानः भवति।

## आन्ध्रप्रदेश-ओडिशा राज्ययोः मोन्था-चक्रवातस्य कारणात प्रचण्डवृष्टिः, प्रचण्डवातश्च प्रवर्तते



**हिमसंस्कृतवार्ताः** - आन्ध्रप्रदेश ओडिशा राज्ययोः मोन्था-चक्रवातस्य कारणात प्रचण्डवृष्टिः, प्रचण्डवातः प्रवर्तते। मचिलीपट्टणम्-कलिङ्गपट्टम क्षेत्रयोः मध्ये काकीनाडा क्षेत्रस्य समीपे चक्रवात प्रवेशस्य संभावना। रेलमंत्री अश्विनी वैष्णवः चक्रवातम् निधाय समीक्षां कृतवान्, रेलविभागीय अधिकारिभ्यः च निर्देशं दत्तवान्। मोन्था चक्रवातः नवतितः शतम् कि. मी. परिमितं यावत् प्रतिहोरायाः वेगेन वायुः दशाधिकैकशतं कि. मी. परिमितं प्रतिहोरा यावत् तीव्र चक्रवातवातरूपेण परिवर्तितः, मोन्था-चक्रवातः आन्ध्रप्रदेशे प्रचण्डवृष्ट्या, प्रचण्डवातेन, जलप्लावनेन च प्रवर्तते। उत्तर-पश्चिम-दिशि गम्यमानस्य चक्रवातस्य मचिलीपट्टणम्-कलिङ्गपट्टम क्षेत्रयोः मध्ये काकीनाडा क्षेत्रस्य समीपे प्रवेशस्य संभवना अस्ति। काकिनाडा, मचिलीपट्टणम्, कृष्णा, पश्चिमगोदावरि, कोनासीमा, बापटला, प्रकाशम, नेल्लोर्, रायलसीमा-ऐषां केषुचित् भागेषु च प्रातःकालादेव प्रचण्डवृष्टिः भवति। काकीनाडा-उप्पदा-क्षेत्रयोः मध्ये अष्ट किलोमीटर् परिमितं यावत् समुद्रतटमार्गः क्षतिग्रस्तः अभवत्। समुद्रस्य स्थितिः अशान्ता एव अस्ति। काकिनाडा-पत्तने आपत्-सङ्केतस्य संचेतना प्रसारिता। अन्येषाम् अपि पत्तनानां कृते न्यूना संचेतना अस्ति। राज्यसर्वकारेण चक्रवात-संभावित-ग्रामात् जनान् आहारैः जलैः च सह सञ्चालितेषु उद्धार-शिबिरेषु स्थानान्तरितं। बृहति स्तरे उद्धारकार्याणि च प्रचलन्ति।

### दक्षिण-तटीय-मण्डलेषु तीव्र 'मोन्था' चक्रवातस्य प्रभावेन वृष्टिः भवति

दक्षिण-तटीय-मण्डलेषु तीव्र 'मोन्था' चक्रवातस्य प्रभावेन वृष्टिः भवति। मुख्यमन्त्री मोहनचरण माझी भुवनेश्वरनगरे 'मोन्था' इत्यस्य कृते राज्यस्य सज्जतायाः मूल्याङ्कनं कर्तुं उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षतां कृतवान्। चेन्नई, तिरुवळ्ळूर, काञ्चीपुरम् इत्येतेषु मण्डलेषु मत्स्यपालनकार्याणि पूर्णतया स्थगितानि। ऋतु विभागेन उत्तरतटीय-तमिलनाडु-प्रदेशे, समीपस्थेषु मण्डलेषु च तीव्रवायु-प्रवाहस्य सञ्चेतना प्रसारिता। चेन्नई-नगरे तथा समीपस्थेषु क्षेत्रेषु लघुतः मध्यमा वर्षा भवति।

## बिहार-विधानसभा-निर्वाचनस्य निर्वाचन-प्रचारः द्रुतगत्या प्रचलति




**हिमसंस्कृतवार्ताः** - बिहार-विधानसभा-निर्वाचनस्य निर्वाचन प्रचारः द्रुतगत्या प्रचलति। अग्रिमे मासे षट्दिनाङ्के प्रथमचरणस्य मतदानं भविष्यति। अतः एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः घटकदलानि मतदातॄन् आकर्षयितुं सर्वविध प्रयासरताः सन्ति। आर्. जे. डी. दलस्य नेता तेजस्वी यादवः अवदत् यत्, महाघटबन्धनम् स्वकीयस्य समूहस्य दृष्टि प्रकाशयन् घोषणापत्रं प्रकाशयिष्यति। सः एन्. डी. ए-पक्षस्य दूरदृष्टेः, कार्यसूच्याः, मुख्यमन्त्रिपदस्य प्रत्याशिनः नाम्नः च विषये प्रश्नान् उत्थापितवान्। भाजपा-दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृहमन्त्री अद्य दरभङ्गा, समस्तीपुर, बेगुसराय् इत्येतेषु स्थानेषु बहुविधं निर्वाचन-सभाम् सम्बोधयिष्यति। तथैव, भाजपा-दलस्य वरिष्ठः नेता तथा रक्षामंत्री राजनाथसिंहः दरभङ्गा, पटना, सारण इत्येतेषु जनपदेषु जनसभां सम्बोधयिष्यति। अत्रान्तरे, आर्. जे. डी. दलस्य नेता तेजस्वी प्रसाद यादवः सारण-जनपदस्य माझी, तरैया, मढौरा, अमनौर, गरखा इत्यत्र च महा-गठबन्धनस्य प्रत्याशिनां समर्थने निर्वाचन सभाम् संबोधयिष्यति।

## सुभाषितम्

**कर्म लोकविरुद्धं तु,**
**कुर्वाणं क्षणदाचर।**
**तीक्ष्णं सर्वजनो हन्ति,**
**सर्पं दुष्टमिवागतम्।।**

हे निशाचर! जो लोक-विरोधी कठोर कर्म करने वाला होता है उसे सभी लोग सामने आए हुए दुष्ट सर्प की भांति मारते हैं। अतः लोक- विरोधी कठोर कर्म से बचना चाहिए।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति



कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्वा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## 'मम युवा भारतम्' (मेरा युवा भारत) २ कोटि पञ्जीकरणम् अतिक्रम्य नूतनम् अभिलेखं प्राप्तवान्

'मम युवा भारतम्' (मेरा युवा भारत) २ कोटि पञ्जीकरणम् अतिक्रम्य नूतनं अभिलेखं प्राप्वान्। युवाकार्याणां क्रीडामन्त्रालयस्य प्रमुखयुव- सङ्गति-परिकल्पना मेरा युवा भारतेन २ कोटिपञ्जीकरणं अतिक्रम्य नूतनम् अभिलेखं प्राप्तम्। युवाकार्याणां क्रीडामन्त्री डॉ. मनसुख मण्डाविया राष्ट्रस्य कृते गौरवपूर्णः क्षणः इति वर्णितवान्। सः अवदत् यत् एषा उपलब्धिः देशस्य युवानां राष्ट्रनिर्माणे भागं ग्रहीतुम् उत्साहम्, ऊर्जां, दृढनिश्चयं च प्रतिबिम्बयति।

# हिमाचलप्रदेशस्य मुख्यमन्त्रिणा सुखविन्द्रसिंहेन उक्तम् सी.बी.एस.ई. विद्यालयानां अध्यापकानां पृथक् संवर्गः भविष्यति



**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः** ।शिमला। मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः सोलनजनपदस्य ममलीग-नाम्नि स्थले विशालां जनसभां समभाष्य ममलीगस्य उपतहसीलम् उत्कर्ष्य तहसीलरूपेण स्थापयितुम् उद्घोषयामास। तेन ममलीगे लोकनिर्माणविभागस्य उपमण्डलस्य उद्घाटनं कर्तुं, विद्यालयस्य निर्माणस्य कृते पञ्चाशत् लक्षरूप्यकाणां दानं च घोषयामास। तस्मै सांस्कृतिककार्यक्रमाय पञ्चाशत् सहस्ररूप्यकाणि दातुं च उक्तम्। सः अवदत् – "राज्ये पारदर्शितायाः सुनिश्चित्यर्थं सर्वकारेण सर्वत्र राजस्वलोक-न्यायालयाः आयोज्यन्ते। पारदर्शितायै 'माई डीड' नामकं परियोजनं आरब्धं येन भूमेः पञ्जीकरणार्थं जनाः सर्वकारीकार्यालयेषु पुनः पुनः गन्तुं न बाध्यन्ते।"

मुख्यमन्त्री अवदत् – "शिक्षायां गुणात्मकपरिष्काराय राज्यसर्वकारेण गम्भीरं अध्ययनं कृत्वा अनेकानि परिष्कारात्मकानि पादानि स्वीकृतानि येषां फलानि अद्य स्पष्टरूपेण दृश्यन्ते। पूर्वे भाजपा-शासनकाले प्रदेशः विद्यार्थिभ्यः गुणात्मकशिक्षायाम् एकविंशतितमे स्थाने आसीत्, किन्तु अद्य राज्यसकरिण गृहीतानां उपायानां फलतः हिमाचलप्रदेशः पञ्चमे स्थाने आगतः।

पूर्वे आवर्षम् अध्यापकानां स्थानान्तरणानि सततं जातानि आसन्, येन बालानां शिक्षायां व्यवधानम् अभवत्। अद्य तु सर्वकारेण दृढनिश्चयेन निर्णयाः स्वीकृताः। ये विद्यालयाः पूर्वभाजपाशासनकाले केवलं राजनैतिकलाभार्थं उद्घाटिताः आसन्, तान् विद्यालयान् वर्तमानसर्वकारेण निरस्तुम् निर्णयः कृतः।"

तेन उक्तम् – "ग्राम्यविद्यालयेषु पठमानानां बालकानां आत्मविश्वासवृद्ध्यर्थं तथा भविष्यस्य आह्वानेभ्यः जेतुं समर्थान् कर्तुं प्रत्येकविधानसभाक्षेत्रे 'राजीवगान्धी डे-बोर्डिंग् स्कूल्' नामकाः विद्यालयाः स्थाप्यन्ते। अद्य ममलीग्-प्रदेशेऽपि अस्य विद्यालयस्य निर्माणम् आरब्धम्।

प्रथमपदे राज्ये शतं विद्यालयानां सी.बी.एस.ई. आधारितान् कृत्वा सर्वेषां विषयाणां अध्यापकान् नियोजयिष्यन्ति। तेषां अध्यापकानां पृथक् संवर्गः भविष्यति। एतेषां विद्यालयेषु पठमानानां विद्यार्थिनां विशेषः गणवेशः भविष्यति। गतवर्षात् राज्ये सर्वकारीविद्यालयेषु अङ्ग्लभाषायां शिक्षणं आरब्धम्।" मुख्यमन्त्री उक्तवान् – "शिक्षया सह स्वास्थ्यक्षेत्रेऽपि परिष्काराय चिकित्सकानां पैरा-मेडिकल् कर्मिणां च नियुक्तयः क्रियमाणाः सन्ति, आधुनिकयन्त्राणि च संस्थाप्यन्ते। पूर्वसर्वकारेण केवलं भवननिर्माणं कृतं, सुविधादानं कर्मिणां नियुक्तिश्च न कृताः, येन रोगिणः कष्टं प्राप्नुवन्ति। वर्तमानसर्वकारेण ऐम्स्-दिल्ली-प्रतिमानुसारं राज्यस्य स्वास्थ्यसंस्थासु आधुनिकमेडिकल्-टेक्नोलोजी स्थापनाय त्रिसहस्रकोटिरूप्यकाणि व्ययति।

अस्य प्रयत्नेन अटल्-सुपर्-स्पेशियलिटी-आयुर्विज्ञान-संस्थानं चमियाणायां, डॉ. राजेन्द्रप्रसादराजकीयचिकित्सामहाविद्यालये टाण्डायां च रोबोटिक्-शल्यचिकित्सासुविधया समृद्धम्। चमियाणा, आई.जी.एम्.सी. शिमला, टाण्डा च इत्येषु स्थानेषु स्वयंचालित-प्रयोगशालाः स्थापयितुं पञ्चसप्ततिः कोटिरूप्यकाणि अनुमोदितानि। एतेन एकस्मिन्नेव रक्तप्रतिरूपेण अनेकपरीक्षणानि शक्यन्ते।"

### जी.एस्.टी. सम्बन्धे मुख्यमन्त्रिणः वचनम्

मुख्यमन्त्री अवदत् – "राज्यसर्वकारः ग्राम्य-अर्थव्यवस्थां सुदृढीकर्तुं प्रयत्नं करोति। भ्रष्टाचारनिवारणाय बहवः उपायाः गृहीताः। पूर्वभाजपाशासनकाले पञ्च कस्टमाइज्ड् पैकेज् अन्तर्गतं पञ्चसहस्रबीघायाः भूमिः केवलं चतुर्दशकोटिरूप्यकैः विक्रयिता, यत्र भूमेः मूल्यं सहस्रकोटिरूप्यकाणि। तेषां विद्युत् जलं च निःशुल्कं प्रदत्तम्।

जी.एस्.टी. नियमस्य प्रवर्तनात् प्रदेशस्य आर्थिकहानिः अभवत्। तस्य प्रतिपूर्त्यर्थं केन्द्रसकरिण केवलं जुलै 2022 पर्यन्तं क्षतिपूर्तिः दत्ता, ततः परं न किञ्चिद्। पूर्वभाजपाशासनकाले पञ्चाशत्सहस्रकोटिरूप्यकाणि अधिकानि लब्धानि, किन्तु तानि जनहितार्थं न व्ययितानि। अद्य राज्यं ऋणं दातुं अपि ऋणं गृह्णाति।"

पूर्वं मुख्यमन्त्रिणः आगमने स्थानिकैः नागरिकैः सस्नेहं स्वागतं कृतम्। तस्मिन्नवसरे विद्यालयस्य पूर्वविद्यार्थिनः, स्वास्थ्यपरिवारकल्याणमन्त्री डॉ. (कर्नल्) धनिरामशाण्डिलः, समग्रशिक्षायाः परियोजनानिदेशकः राजेशः शर्मा च विद्यालयप्रबन्धनपक्षतः सम्मानिताः।

डॉ. शाण्डिलः अवदत् – "वर्तमानसर्वकारः मुख्यमन्त्रिणः नेतृत्वे शिक्षायां गुणात्मकपरिष्काराय विशेषं प्रयत्नं करोति। तस्मिन्नेव हेतोः अद्य ममलीगे राजीवगान्धी डे-बोर्डिंग् विद्यालयस्य शिलान्यासः कृतः। शिक्षास्वास्थ्ययोः क्षेत्रयोः विकासाय ग्राम्य-अर्थव्यवस्थायाश्च सशक्तीकरणाय राज्यसकरिण विशेषाः योजनाः आरब्धाः।"

तस्मिन्नेव अवसरे विधायकः रामकुमारचौधरी, संजयः अवस्थी, सुरेशकुमारः, जोगिन्द्रवित्तकोषस्य अध्यक्षः मुकेशः शर्मा, कांग्रेसनेता शिवकुमारः, राहुलठाकुरः, जतिनसाहनी, कर्नल् संजयशाण्डिलः, उपायुक्तः मनमोहनशर्मा, पुलिसाधीक्षकः गौरवसिंहः च अन्ये च मान्यजनाः उपस्थिताः आसन्।

## Himachal News: हिमाचलप्रदेशे प्रतिव्यक्ति-आयः राष्ट्रिय- औसतात् ₹22,653 अधिकः अस्ति



संयुक्तराष्ट्रविकासकार्यक्रमस्य (UNDP) मानवविकासप्रतिवेदने आर्थिकस्तरे हिमाचलप्रदेशस्य भूमिकायाः उपलब्धीनां च विषये अपि केन्द्रितम् आसीत्। लघुपर्वतराज्यं हिमाचलराज्यं प्रतिव्यक्ति-आयस्य दृष्ट्या देशे चिरकालात् प्रमुखं स्थानं धारयति। हिमाचलस्य प्रतिव्यक्तिं आयः औसतात् अधिकः अस्ति। २०२४-२५ तमे वर्षे हिमाचलस्य प्रतिव्यक्ति-आयः ₹ २५७,५१२ इति अभिलेखः अभवत्। एतत् पूर्ववित्तवर्षस्य अपेक्षया ९.६ प्रतिशतं वृद्धिः अस्ति, यदा राष्ट्रियप्रतिव्यक्ति- आयः ₹२३४,८५९ अस्ति। हिमाचलस्य प्रतिव्यक्ति-आयस्य एषः विलक्षणः आकङ्क्षः उद्यान-निर्माण-पर्यटन-सदृशानां सेवाक्षेत्राणां कारणेन अस्ति। हिमाचले प्रतिव्यक्ति- आयस्य दृष्ट्या सोलनमण्डलं शीर्षस्थाने अस्ति। एतत् अस्य उद्योगस्य कारणतः, तथैव टमाटरस्य, कवकस्य च उत्पादनस्य कारणम् अस्ति। शिमलामण्डलं पञ्चमस्थाने अस्ति, प्रतिव्यक्ति- आयस्य दृष्ट्या कांगड़ामण्डलं तु अधः अस्ति। एतत् कांगड़ा-जनसंख्यायाः कारणम् अपि अस्ति। प्रतिव्यक्ति- आयं विविधकारकैः प्रभावितं भवति इति ज्ञातव्यम्। एतेषु जनसंख्याघनत्वं, उद्योगस्य स्तरः, पर्यटकानाम् आवागमनं, प्राकृतिकसंसाधनानाम् उपलब्धिः च सन्ति।

एते तथ्याः मानवविकाससूचकाङ्कप्रतिवेदने २०२५ तमे वर्षे प्रकाशिताः आसन्। जिलावारप्रतिव्यक्ति- आयस्य तथ्यानि २०२२-२३ वर्षस्य सन्ति। एतानि तथ्यानि दृष्ट्वा उद्योगेन चालितं सोलनमण्डलं सूचौ अग्रणी अस्ति। रोचकं तत् अस्ति यत् सोलनस्य पार्श्वे लाहौल, किन्नौर-मण्डलानि अपि अस्मिन् सूचौ दृश्यन्ते। तेषां समृद्धिः मुख्यतया तेषां न्यूनजनसंख्याघनत्वस्य कारणेन भवति। सोलनमण्डलस्य प्रतिव्यक्ति- आयं २०२२-२३ वित्तवर्षे प्रतिव्यक्तिं ₹८ लक्षं इति अनुमानितम् आसीत्। सोलनस्य अनुसरणं लाहौल स्पीति अस्ति, यत्र प्रतिव्यक्तिं आयः ₹३ लक्षस्य परिधिः अस्ति। तथैव सिरमौरमण्डलस्य प्रतिव्यक्तिआयः ₹२५०,०००तः किञ्चित् अधिकः अस्ति। किन्नौरस्य आकृतयः सिरमौरमण्डलस्य अपि समीपे एव सन्ति। शिमलामण्डलं पञ्चमम् अस्ति, यत्र प्रायः ₹२ लक्षं भवति। ततः कुल्लू, उना, बिलासपुर, चम्बा, मण्डी, हमीरपुर, कांगड़ा च आगच्छन्ति। अत्र प्रतिव्यक्ति-आयस्य न्यूनता अधिका जनसंख्यायाः, उद्योगानाम् अभावस्य च कारणम् अस्ति। कुल्लुतः कांगड़ापर्यन्तम् एतेषां मण्डलानां प्रतिव्यक्ति- आयं द्विलक्षरूप्यकात् न्यूनम् अस्ति। कांगड़ा अस्यां सूचौ अधः अस्ति, यस्य प्रतिव्यक्ति- आयः एकलक्षरूप्यकाणां किञ्चित् अधिकं भवति।

## केन्द्रीयकोयलामन्त्री किशन रेड्डी नवदेहलीनगरे स्मार्टकोयलाविश्लेषण डैशबोर्डस्य कोयलाशक्तिं प्रारम्भं करिष्यति

**हिमसंस्कृतवार्ताः:-** केन्द्रीयकोयलाखानमन्त्री जी. किशन रेड्डी श्वः नवीदिल्लीनगरे स्मार्टकोयलाविश्लेषणं कोयलाशक्तिं प्रारभयिष्यति। रेड्डीमहोदयेन उक्तं यत् एषः डैशबोर्डः कोयलाक्षेत्रस्य परिचालनस्य वास्तविकसमयनिरीक्षणस्य विश्लेषणस्य च एकीकृतमञ्चरूपेण कार्यं करिष्यति। डैशबोर्ड अङ्गारस्य उत्पादनम्, आवश्यकता, रसदं, प्रेषणं च सम्बद्धानि तथ्यानि अपि एकीकृत्य विश्लेषयिष्यति। एतेन सम्पूर्णे क्षेत्रे परिचालनपारदर्शिता, कार्यक्षमता च सुदृढा भविष्यति।

# मुख्यमन्त्री सुक्खुः दिल्लीम् प्राप्तः, अद्य वित्तमन्त्रिणा सह मेलनम्



मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः हिमाचलस्य वित्तीयविषयान् सम्बोधयितुं दिल्लीनगरम् आगतः। अर्कीविधानसभाक्षेत्रस्य भ्रमणं कृत्वा मुख्यमन्त्री मंगलवासरे सायं देहलीनगरं प्रति प्रस्थितवान्। बुधवासरे सः केन्द्रीयवित्तमन्त्री निर्मलासीतारमणादिभिः मन्त्रिभिः सह मिलति। मुख्यमन्त्री सीतारमणेन सह मिलनसमये जीएसटी- प्रवर्तनकारणात् प्राप्तस्य हानिः प्राकृतिकविपदानां च क्षतिविषये राज्यं ज्ञापयिष्यति। अस्मिन् वर्षे राज्यं न्यूनतमं राजस्वघातानुदानमपि प्राप्नोति, अतः सः एतेषां तर्कानाम् आधारेण राज्यस्य ऋणसीमायां वृद्धिं याचयितुम् अर्हति। हिमाचलस्य भ्रमणकाले प्रधानमन्त्री नरेन्द्रमोदी आपदाक्षतिपूर्तिरूपेण ₹१५०० कोटिरूप्यकाणां राहतपैकेज घोषितवान्, परन्तु एतत् धनम् अद्यापि न प्राप्तम्। मुख्यमन्त्री दिल्ली-भ्रमणकाले अपि अस्य विषये चर्चां करिष्यति। हिमाचलं प्रत्यागत्य मुख्यमन्त्री मण्डीमण्डलं गमिष्यति, यत्र अस्मिन् मानसूनऋतौ कृते हानिः क्षतिपूर्तिं कर्तुं राहतपैकेजस्य घोषणा भविष्यति। अस्याः घोषणायाः पूर्वं प्रधानमन्त्रिणः संकुलसम्बद्धस्य स्थितिः स्पष्टीकर्तुं दिल्लीनगरे चर्चा प्रचलति। अस्मिन् भ्रमणकाले मुख्यमन्त्री १६ वित्तआयोगस्य अध्यक्षं पुनः एकवारं मिलितुं शक्नोति। सः डॉ. अरविन्दपनागरिया इत्यनेन सह प्रायः चतुर्वारं मिलितवान् अस्ति। अस्मिन् वर्षे नवम्बरमासे वा डिसेम्बरमासे वा १६ तमे वित्त- आयोगस्य प्रतिवेदनस्य अपेक्षा अस्ति, यत्र केन्द्रीयकरस्य भागरूपेण आगामिपञ्चवर्षेषु राज्यस्य भागः निर्धारितं भविष्यति। राज्यसर्वकारः अपि आगामिपञ्चवर्षेभ्यः राजस्व- न्यूनतानुदानं वर्धयितुम् इच्छति, येन वित्त- आयोगेन सह एषा समागमः महत्त्वपूर्णा भविष्यति।

मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः बिहारविधानसभानिर्वाचनार्थं काङ्ग्रेसपक्षस्य ताराप्रचारकसूचौ समाविष्टः अस्ति, अतः निर्वाचनप्रचाराय बिहारस्य अपि भ्रमणं करिष्यति। विशेषता अस्ति यत् सुखविन्दरसिंह सुक्खुः ४० तारा-अभियानकानां मध्ये सूचीकृतः अस्ति, यत्र राष्ट्रिय-नेता सूचौ षष्ठस्थाने अस्ति। तस्य पूर्वं राष्ट्रियराष्ट्रपतिः मल्लिकार्जुन खड़गे, सोनियागान्धी, राहुलगान्धी, केसीवेनुगोपालः, प्रियङ्कागान्धी च सन्ति। तस्य दिल्लीभ्रमणेन सह तस्य बिहारभ्रमणं भविष्यति वा तदनन्तरं वा तस्य कार्यक्रमः अद्यापि न प्रकाशितः।

# हिमाचलस्य महिलाः प्रधानमंत्री उज्ज्वलायोजनायाः लाभं लब्धुं शक्नुवन्ति, यतः केन्द्रसर्वकारेण राज्ये योजनायाः पुनः आरम्भः कृतः




हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।

प्रधानमन्त्री-उज्ज्वलायोजनायाः (PM Ujjwala Yojana) लाभं हिमाचलप्रदेशे महिलाः प्राप्स्यन्ति। केन्द्रसर्वकारेण हिमाचलप्रदेशे एषा योजना पुनः आरब्धा, या २०२३ तमस्य वर्षस्य डिसेम्बरमासे स्थगिता आसीत्, योग्याः महिलाः सुनिश्चितं कुर्वन्तु यत् ते यथाशीघ्रं स्वपञ्चायतगृहे योजनाप्रपत्रं पूरयितुं शक्नुवन्ति येन ते निःशुल्कं अनिलचुल्लीं अनिलकोशं च प्राप्तुं शक्नुवन्ति। केन्द्रसर्वकारेण प्रारब्धा एषा योजना निर्धनाः महिलाः मृत्तिकाचुल्लिकायाः उपयोगात् मुक्ताः भविष्यन्ति। अस्याः योजनायाः प्राथमिकम् उद्देश्यं ग्रामीणक्षेत्रेषु पाककलायां जीवाश्म-इन्धनस्य स्थाने एलपीजी-इन्धनस्य उपयोगं प्रवर्तयितुं वर्तते । केन्द्रसर्वकारः गैसस्य मूल्यवृद्ध्या उज्ज्वलायोजनायाः लाभार्थिभ्यः प्रतिसिलिण्डरं ₹३३९ इत्येव अनुदानं अपि प्रददाति। अतः योग्यमहिलाभिः प्रधानमन्त्री-उज्ज्वलायोजनायाः प्रपत्रं यथाशीघ्रं पूरयितुं सुनिश्चितं कर्तव्यम्। राज्ये दरिद्राः प्रौढाः महिलाः गैस-संयोजनाय आवेदनं कर्तुं शक्नुवन्ति । आवेदकस्य परिवारे कोऽपि करदाता वा सर्वकारीयः कर्मचारी वा न भवेत्।स्त्रिया सार्धद्वि-एकड़ाधिकं सिञ्चितभूमिं पञ्चैकं वा असिञ्चितभूमिं वा न स्वामित्वं कुर्यात् । ततश्च स्त्रियाः कुटुम्बस्य त्रिचक्रं चतुश्चक्रं वा न स्वामित्वं भवेत्, न च तस्याः नाम्ना गैससंयोजनं भवेत् । ज्ञातव्यं यत् प्रधानमन्त्रि उज्ज्वला योजना राष्ट्रव्यापिरूपेण २०१६ तमस्य वर्षस्य मे-मासस्य प्रथमदिनाङ्के प्रारम्भः अभवत् । हिमाचलप्रदेशे २०२३ तमस्य वर्षस्य डिसेम्बरमासे एषा योजना निरस्ता अभवत् ततः परं राज्ये महिलाः प्रधानमन्त्रि उज्ज्वलायोजनायाः लाभं प्राप्तुं असमर्थाः अभवन्। सम्प्रति हिमाचले प्रधानमन्त्री उज्ज्वला योजना पुनः स्थापिता। अतः राज्यस्य योग्या निर्धनाः महिलाः स्वपञ्चायतगृहे योजनाप्रपत्रं यथाशीघ्रं पूरयितुं सुनिश्चितं कुर्वन्तु येन ते निःशुल्कं अनिलकोशं चुल्लीं च प्राप्तुं शक्नुवन्ति।

# इदानीं भारते एव भविष्यति यात्रीविमानानां निर्माणम्




हिमसंस्कृतवार्ताः- इदानीं भारते यात्रीविमानानां निर्माणं भविष्यति, रूसदेशः एच. ए. एल. च सहभागितां कृत्वा, एसजे-१०० विमानेन सह विमानयात्रायाः त्वरिततायै। सप्तवर्षान्तरस्य अनन्तरं भारते पुनः यात्रिकविमानानां निर्माणं भविष्यति। अस्य कृते हिन्दुस्तान एरोनॉटिक्स लिमिटेड (HAL) इत्यनेन रूसीराज्यस्वामित्वयुक्तेन कम्पनी यूनाइटेड एयरक्राफ्ट कार्पोरेशन (PJSC-VAC) इत्यनेन सह सहमतिपत्रं हस्ताक्षरितम् अस्ति। अस्मिन् सहभागितया अधुना भारते अपि रूसस्य एसजे- १०० सिविल-यात्रिकविमानस्य निर्माणं भविष्यति। एतत् चरणं लघुनगरेभ्यः वायुसम्बद्धतां प्रदातुं क्रीडापरिवर्तकं सिद्धं भवितुम् अर्हति। मास्कोनगरे मंगलवासरे एचएएल-संस्थायाः प्रभातरंजनः, पीजेएससी-वीएसी-संस्थायाः ओलेग बोगोमोलोवः च सहमतिपत्रे हस्ताक्षरं कृतवन्तः।

ज्ञातव्यं यत् भारते अन्तिमा पूर्णरूपेण यात्रिक- विमाननिर्माण- परियोजना १९६१ तः १९८८ पर्यन्तं प्रचलति स्म। अस्याः HAL परियोजनायाः नाम Avro HS 748 इति अभवत् तदनन्तरं वयं विमानानाम् आयातं आरब्धवन्तः। रूसदेशेन सह एषः सम्बन्धः भारतस्य आयात-निर्भरतां न्यूनीकर्तुं शक्नोति। एच ए एल इति भारतीयराज्यस्वामित्वयुक्ता कम्पनी अधिकतया सैन्यविमानानि निर्माति, यथा तेजस् युद्धविमानम्। परन्तु अधुना नागरिकविमानयानं प्रविशति। एच ए एल इत्यस्य कथनमस्ति यत् एतत् एमओयू तस्य विविधीकरणस्य भागः अस्ति। इदानीं रूसस्य राज्यस्वामित्वयुक्ता एयरोस्पेस् कम्पनी PJSC-VAC (Public Joint Stock Company United Aircraft Corporation) सैन्यविमानानां, नागरिकविमानानां निर्माणं करोति। अस्मिन् एसजे- १०० इत्यस्य पूर्णप्रौद्योगिकी, अनुभवः च अस्ति। पीजेएससी-वीएसी इत्यनेन २०० तः अधिकाः एसजे-१०० विमानाः निर्मिताः, ये १६ तः अधिकैः वाणिज्यिकविमानसेवासञ्चालकैः सह सेवायां सन्ति। एषा सहभागिता दीर्घकालीनस्य रूस-भारत-रक्षा-सम्बन्धस्य विस्तारं नागरिकक्षेत्रे करोति। एच ए एल एस जे-१०० इत्यस्य निर्माणस्य अधिकारं प्राप्स्यति, येन भारते स्थानीयं उत्पादनं सम्भवं भविष्यति। इदं विमानं लघुमार्गेषु परिपूर्णम् अस्ति, यत्र ७५-१०० यात्रिकाः वहन्ति। अयं अल्पदूरविमानयानानां कृते अर्थात् १०० तः ५०० किलोमीटर्पर्यन्तं यात्रायाः कृते निर्मितः अस्ति। रूसदेशे सफलम् अस्ति। एच ए एल कथयति यत् भारते एस जे-१०० इत्यस्य निर्माणं यूडीएएन योजनायाः कृते क्रीडापरिवर्तकं सिद्धं भविष्यति। इदं विमानं ईंधन-कुशलं भवति, स्थानीय-उत्पादनेन व्ययस्य न्यूनीकरणं भविष्यति। UDAN (उड़े देश का आम नागरिक) योजनायाः अन्तर्गतं लघुनगराणि सम्बद्धानि भवन्ति। भारते आगामिषु १० वर्षेषु एतादृशानां २०० तः अधिकानां जेट-विमानानाम् आवश्यकता वर्तते। यूडीएएन योजनायाः अन्तर्गतं शताधिकानि नूतनानि विमानस्थानकानि निर्मीयन्ते। एसजे-१०० तेषां जीवनरेखा भविष्यति।

# राष्ट्रपतिः द्रौपदी मुर्मुः अन्ताराष्ट्रिय-सौर-सङ्घटनस्य (आई. एस्. ए.) इत्यस्य सभायाः अष्टमं सत्रं उद्घाटितवती जलवायु परिवर्तनस्य समाह्वानान् निवारणाय त्वरितस्य दृढस्य च उपायानां उपरि बलम् प्रदत्तवती




**हिमसंस्कृतवार्ताः -** राष्ट्रपतिः द्रौपदी मुर्मुः जलवायु परिवर्तनस्य समाह्वानान् निवारणाय त्वरितस्य दृढस्य च उपायानां आवश्यकतायाः उपरि बलम् प्रदत्तवती। यस्य सम्पूर्ण विश्वे प्रभावः दृश्यते इति अवधानं दत्तवती। नवदेहली-नगरे अन्ताराष्ट्रिय-सौर-सङ्घटनस्य (आई. एस्. ए.) इत्यस्य सभायाः अष्टमे सत्रे मुख्याभिभाषणं कुर्वन्ती राष्ट्रपतिः अवधानं दत्तवती यत् भारतं जलवायु परिवर्तनस्य समाह्वानान् निवारणाय प्रतिबद्धः अस्ति, तथा च अस्मिन् विषये दृढपदाक्षेपाणि स्वीकरोति। सा उल्लिखितवती यत् भारते तथा सम्पूर्ण विश्वे सभ्यताः दीर्घकालं यावत् सूर्यम् जीवनस्य ऊर्जायाः च परमस्रोतरूपेण स्वीकुर्वन्ति। वैश्विकरूपेण अन्ताराष्ट्रिय-सौर-सङ्घटनस्य उल्लेखनीयं प्रगतिम् अवलम्ब्य राष्ट्रपतिः अवधानं दत्तवती यत् अग्रिमे चरणे गहनसमावेशः भवेत्, येन अस्मिन् सौरक्रान्त्यां काचित् अपि महिला, कृषकः, ग्रामः, लघुद्वीपः वा अवशिष्टः न भवेत् इति सुनिश्चितं भवेत्।




**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** शुभं भवतु नन्दिनि। प्रथमः वृत्तान्तः अतीव गभीरः। काश्मीर-प्रति-गुप्तचर-विभागः एकम् अन्तर्जालिक-आतङ्कवाद-षड्यन्त्रं निवारितवान् अस्ति। तथा च, द्वौ काश्मीर-युवकौ मूलतत्त्ववादात् रक्षितवान् अस्ति।

**नन्दिनी-** अतीव गभीरः विषयः सः, परन्तु युवकयोः रक्षणं कृतम् इति उत्तमम्। अधुना अग्रिमः वृत्तान्तः। भारतीय-सेना नवसप्ततितमं पदाति-दिवसं आचरितवती अस्ति। वराहमूले च गम्भीराञ्जलयः दत्ताः सन्ति।

**काव्या-** आम्, वराहमूले वीरेभ्यः श्रद्धाञ्जलिः दत्ता इति श्रुत्वा सन्तोषः जातः। इदानीम् अपराध-जगतः वृत्तान्तः। कुख्यातस्य दस्योः लॉरेंस्-बिश्नोई-इत्यस्य सहाय्यकः लखा अमेरिकातः भारतं प्रति निर्वासितः अस्ति। सः इदानीम् आरक्षक-अभिरक्षायां वर्तते।

**नन्दिनी-** अपराधिनः न्यायस्य आधीनतां गच्छन्ति इति समीचीनम्। अधुना राजनैतिकः वृत्तान्तः। जम्मू-काश्मीरस्य राज्यत्वस्य पुनर्स्थापने विलम्बः जातः इति विषये मुख्यमन्त्री ओमर-अब्दुल्लाहः गभीरां चिन्तां प्रकटितवान् अस्ति।

**काव्या-** हरियाणा-राज्ये कृत्रिम-बुद्धि-द्वारा निर्मितानि अश्लीलानि चलचित्राणि एकस्य नवदश-वर्षीयस्य किशोरस्य दुःखदं मृत्युं कारितवन्ति सन्ति।

**नन्दिनी-** अहो, इदं तु अतीव दारुणं वृत्तम्। तन्त्रज्ञानस्य दुरुपयोगः कथं विनाशकारी भवितुम् अर्हति इति अनेन ज्ञायते। अस्तु, अद्यतन-वृत्तान्ताः एतावन्तः एव। पुनः मिलामः। नमस्कारः।

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# शास्त्रवर्णितः कश्चन विशिष्टजपः, 'अजपाजपः'



भगवत्प्राप्तिसम्बद्धाः अनेके मार्गाः शास्त्रेषु वर्णिताः उपलभ्यन्ते। कर्मयोगः, ज्ञानयोगः, भक्तियोगः, लययोगः, व्रतः, तपश्चरणम्, त्यागः, यज्ञः, स्वाध्यायः, जपः, कीर्तनम् इत्यादयः अनेके मुक्तिमार्गाः शास्त्रैरत्यन्तं सम्यक्तया निर्दिष्टाः, प्रतिपादिताश्च सन्ति। तेषु अजपाजपः अन्यतमः। प्रकारोऽयं विलक्षणः। एतस्मिन् जपे साधकस्य किमपि कर्तव्यं नास्ति, तत्स्वयं साध्यते।

'न जप्यते, नोच्चार्यते इति अजपा।' इति, अपि तु श्वासप्रश्वासयोर्गमनागमनाभ्यां सम्पाद्यते। अर्थात् श्वासप्रश्वासद्वारा अयं जपः स्वयं भवति नैरन्तर्येण, केवलमत्र सङ्कल्पः कार्यः।

**'अजपा नाम गायत्री योगिनां मोक्षदायिनी।**
**तस्याः संकल्पमात्रेण जीवन्मुक्तो न संशयः।।'**
इति आचाररत्ने।

मानवशरीरम् अत्यन्तं महत्वपूर्णं दुर्लभञ्च। यदि शास्त्रानुसारम् एतस्य उपयोगः क्रियेत तर्हि मनुष्यो ब्रह्म अवाप्नुयात् इत्यत्र न शङ्का। अजपाजपः सुगमसाधनभूतो वर्तते। अनेन साधनेन सम्यक्तया अभिज्ञायते यत् जीवोपरि भगवतः कियती असीमानुकम्पा स्यादिति। अजपाजपस्य सङ्कल्पमात्रेण चतुर्विंशतिहोरासु एकक्षणमपि व्यर्थं न भवति। सः साधकः जागरण- स्वप्न- सुषुप्त्यादीनां सर्वावस्थानां, प्रत्येकं स्थितौ 'हंसः' इत्यस्य जपं श्वासक्रियाद्वारा अनायासेन हि स्वयं कुर्वन् भवति। सङ्कल्पमात्रेणापि जपोऽयं मनुष्येण विहितः इति भगवता स्वीक्रियते। क्रियमाणस्य अजपाजपस्य समर्पण-संकल्प एवं भवतीति केवलम् उपमार्थमत्र प्रस्तूयते-

ओं विष्णुर्विष्णुर्विष्णु अद्य .... (कालस्थानादिनां, स्वनामगोत्राणाम् उच्चारणपूर्वकम्) अहं ह्यस्तनसूर्योदयारभ्य अद्यतनसूर्योदयपर्यन्तं श्वासक्रियया भगवता कारितं 'अजपागायत्रीजपकर्म' श्रीभगवते समर्पये। ओं तत्सत् ब्रह्मार्पणमस्तु।

पुनरद्यतन- सूर्योदयाद् आरभ्य श्वस्तन-सूर्योदयपर्यन्तं करिष्यमाणस्य अजपाजपकर्मणः संकल्प एवं भवति- 'ओं विष्णुः ...... अहं' ....... अद्य सूर्योदयादारभ्य श्वस्तनसूर्योदयपर्यन्तं षट्शताधिकैकविंशतिसहस्र-(२१६००) सङ्ख्यकोच्छ्वासनिःश्वासाभ्यां, हंसं सोहंरूपाभ्यां गणेश- ब्रह्म- विष्णु- महेश- जीवात्म- परमात्म- गुरुप्रीत्यर्थम् अजपागायत्रीजपं करिष्ये।' इति।

जपोऽयं विनाप्रयासेनापि निरन्तरं प्रवर्तते, तस्मादयम् अजपाजपः इति नाम्ना ख्यातोऽस्ति। तन्नित्यविहितस्य सङ्कल्पानन्तरं भगवन्नामकीर्तनं, नित्यसन्ध्यादिकर्म विधेयमिति अजपाजपस्य तात्पर्यम्, शुभम्।

# २०४७ तमवर्षपर्यन्तं विकसितभारतस्य दृष्टिः पूर्णं कर्तुं सर्वेषां परिश्रमः करणीयः- उपराष्ट्रपतिः सी. पी. राधाकृष्णन

तमिलनाडुदेशे उपराष्ट्रपतिः सी. पी. राधाकृष्णन् उक्तवान् यत् २०४७ तमवर्षपर्यन्तं विकसितभारतस्य दृष्टिः पूर्णं कर्तुं सर्वेषां परिश्रमः करणीयः। अद्य कोयम्बटूरनागरिकमञ्चे वदन् सः अवदत् यत् उद्योगे श्रमिकाः कृषिक्षेत्रे च कृषकाः देशस्य विकासस्य विकासस्य च मेरुदण्डः सन्ति। उपराष्ट्रपतिः अवदत् यत् आधुनिकीकरणेन श्रमिकाः न समाप्ताः भवन्ति, अपि तु उद्योगस्य विकासे योगदानं भवति। उपराष्ट्रपतिः अद्य सेशेल्स- राष्ट्रपतिस्य शपथग्रहणसमारोहे भागं गृहीत्वा कोयम्बटूरनगरम् आगतः। उद्योगनेतृभिः राज्यसर्वकारस्य प्रतिनिधिभिः च तस्य हार्दिकं स्वागतं कृतम्।

## ज्ञान-विज्ञानस्य तथा योगस्य भाषा संस्कृतम् - स्वामी श्रीप्रीतममणिजी



**हिमसंस्कृतवार्ताः, डॉ. रघुराम लश्करी,प्रान्तमन्त्री, संस्कृतभारती, गुर्जरप्रान्तः**

संस्कृतभारतीगुर्जरप्रान्तस्य आवासीयप्रबोधनवर्गस्य उद्घाटनकार्यक्रमः लकुलीशसनातनसंस्कृतविद्यापीठ-कायवरोहणे सम्पन्नः। उक्तकार्यक्रमे मुख्यवक्तृरूपेण संस्कृतभारत्याः उपाध्यक्षः प्रो.जितेन्द्रब्रह्मभट्टः अवदत् यत् आङ्ग्लानाम् आगमनात् पूर्वं विद्यालयेषु महाविद्यालयेषु अपि च गुरुकुलेषु शिक्षणस्य माध्यमं संस्कृतमेव आसीत्। ४०० वर्षात् पूर्वं ज्ञानविज्ञानपूर्णानां संस्कृतग्रन्थानाम् अनुवादाः कस्यापि भारतीयभाषायां नोपलभ्यन्ते । एतेन अध्ययनस्य अध्यापनस्य च माध्यमं केवलं संस्कृतभाषा एव आसीत् इति सिद्धं भवति । कार्यक्रमेऽस्मिन् छात्रेभ्यः स्वामी श्रीप्रीतममुनिजी उक्तवान् यत् संस्कृतं न केवलं ज्ञानस्य विज्ञानस्य च भाषा अपि तु योगस्य तथैव संपूर्णब्रह्माण्डस्य भाषा अस्ति। अस्माकं संस्कृतिं रक्षितुं बालेभ्यः अवश्यं संस्कृतं शिक्षितव्यम्।

कार्यक्रमस्य सुचारुरूपेण संचालनं संस्कृतशिक्षकः श्रीजयेशटांकमहोदयः तथा धन्यवादज्ञापनं डॉ.दिलीपसिंहचौहाणः कृतवन्तौ।

## रम्या-रम्या संस्कृतभाषा


रम्या-रम्या संस्कृतभाषा, ख्याता इयं धरातले ।
पठिता यैस्स्नाताः गङ्गाजले ।।
1.देशे- देशे अस्याः महिमा ।श्रुता किन्न त्वया हले,
पठिता यैस्स्नाताः गङ्गाजले ।।
2. चत्वारो वेदाः अस्यां पूताः ।गुञ्जन्ति मन्त्राः भूमण्डले, पठिता यैस्स्नाताः गङ्गाजले ।।
3. देव्याः काल्याः आसीद्दासः । गुरुरासीत् सः कविकुले, पठिता यैस्स्नाताः गङ्गाजले ।।
4. उत्तमाऽत्र योगस्य विद्या ।
ख्यातावश्विनीकुमारौ यथा शल्ये, पठिता यैस्स्नाताः गङ्गाजले ।
5. बहवः श्लोकाःअस्यां नीतेः ।
भव सता सत्त्वम् वक्रो कुटिले, पठिता यैस्स्नाताः गङ्गाजले ।।
6.भिन्नाः भिन्नाः अस्यां शिक्षाः ।
यथा काश्यपोपदेशश्शाकुन्तले, पठिता यैस्स्नाताः गङ्गाजले ।।
7.सेवकः शास्त्री जयभगवान् ।वसति अधुना स कपिस्थले, पठिता यैस्स्नाताः गङ्गाजले ।।

**लेखकः:- पं० जय भगवान् शास्त्री 'कैथल' हरियाणा। ( संस्कृताध्यापकः )।**
**राजकीय वरिष्ठ माध्यमिक विद्यालयः कठवाड़ः (कैथलनगरम्) दूरवाणीसंख्या-9991829095**
**इदं गीतं 'JM SHASTRI BIRLA' इति यूट्यूब चैनले उपलब्धमस्ति।**

# नीति- आयोगेन भारतस्य सेवाक्षेत्रस्य विषये प्रकाशितौ द्वौ प्रतिवेदनौ

सत्यमेव जयते
नीति आयोग

**हिमसंस्कृतवार्ताः-** नीति- आयोगेन अद्य भारतस्य सेवाक्षेत्रस्य विषये द्वौ प्रतिवेदनौ प्रकाशितौ, यत्र उत्पादनस्य, रोजगारस्य च व्यापकदृष्ट्या मूल्याङ्कनं कृतम्। आल इण्डिया रेडियो न्यूज इत्यनेन सह विशेषसाक्षात्कारे नीति- आयोगसदस्यः डॉ. अरविन्दविर्मणिः अवदत् यत् प्रथमवारम् आन्तरिकसेवाक्षेत्रस्य व्यवस्थितरूपेण अध्ययनं कर्तुं, क्षेत्रस्य गहनप्रतिवेदनानि च निर्मातुं सेवाविभागस्य स्थापना कृता। अद्य रात्रौ सायं ९:३० वादनतः ९:३० वादनपर्यन्तं एतत् अनन्यसाक्षात्कारं १००.१ अखिलभारतीयरेडियो एफएम गोल्ड इत्यत्र श्रूयते। केन्द्रीय- कृषि- कृषक- कल्याणमन्त्री शिवराजसिंहचौहानः उक्तवान् यत् केन्द्रसर्वकारः कृषकाणां कृते उचिततया अल्पदरेण च उर्वरकस्य उपलब्धतां सुनिश्चित्य प्रतिबद्धः अस्ति। चौहानमहोदयेन सूचितं यत् खरीफ २०२५ कालखण्डे वपनम् अत्यन्तं सन्तोषजनकं जातम्। अस्मिन् वर्षे धानस्य अधः रोपितस्य कुलक्षेत्रं ४ कोटि हेक्टेयर अतिक्रान्तम् अस्ति। तैलबीजानां अधः कुलक्षेत्रं १९० लक्षहेक्टेयर अधिकं भवति, यत्र सोयाबीनः, मूंगफली च प्रमुखसस्यानि सन्ति। तथैव एककोटिहेक्टेयर क्षेत्रे दालसस्यानि रोपितानि सन्ति, यत् पोषणसुरक्षायाः महत्त्वपूर्णं सोपानम् अस्ति। विनिर्माणक्षेत्रस्य उत्तमप्रदर्शनस्य कारणात् अस्मिन् वर्षे सितम्बरमासे देशस्य औद्योगिकउत्पादने वार्षिकरूपेण ४ प्रतिशतं वृद्धिः अभवत्। सांख्यिकी- कार्यक्रम- कार्यन्वयन- मन्त्रालयेन प्रकाशित- आँकडानां अनुसारं औद्योगिक- उत्पादन- सूचकाङ्क- IIP इत्यस्य त्रयोः प्रमुखघटकयोः मध्ये विनिर्माणक्षेत्रे ४.८ प्रतिशतं, विद्युत्क्षेत्रे च ३.१ प्रतिशतं वृद्धिः अभवत् परन्तु खननक्षेत्रे दुर्बलं प्रदर्शनं कृत्वा ०.४ प्रतिशतं न्यूनता पञ्जीकृता। इदानीम् अस्मिन् वर्षे अगस्तमासस्य आईआईपी-वृद्धेः दरः ४.१ प्रतिशतं यावत् संशोधितः अस्ति।




**रवींद्र कुमार शर्मा घुमारवीं**
**जिला बिलासपुर हि प्र**

## बधी गई हर चीजा री भुख

अज्जकल जिसजो बी देखो बधी गई हर चीजा री भुख दो फुट जमीन खातर भाई दित्ते मारी बड्डी दिते छोटे बड़े सारे रुख
लूण पिपल़िया कने खाई कने बी करदे थे गुज़ारा बौहत मुश्क़िला रे टैमा ई चकदे थे पैसा तवाहरा ब्याज बौहत देणे पौन्दा था पर मुकरदे नी थे साहूकार ब्याज़ा च ई लेई जांदा था फसला रा नाज सारा
पैसे री भुख अज्जकल सबीं जो बौहत ज़्यादा मेहनत नी करनी पवो रातों रात अमीर बणना चाहन्दे अपनी संस्कृति भुली कने करदे पुट्ठे कम्म कई तां पैसे खातर
चिट्टे रे गुलाम बणी जांदे
कोई नेता बणी कने अपना नांव चमकांदा पुलसा री वर्दी पहनी कने बी कोई रिश्वत खाँदा घरें बी किसिरे मन्जयां बिच मिलदे नोट सोना चांदी बेहिसाब सब लौकरां बिच छुपांदा
दो वक्त रिया रोटियां खातर कोई दिन रात कमान्दा धियाड़ी मज़दूरी बी करदा कने खेतां बी बाहन्दा पूरी उम्र करदा रहया भ्यागा ते संजा तिक कम्म ई कम्म पल्ले कुछ नी पया रहया जिंदगी भर करलांदा
जे भुख ज्यादा नी हुन्दी तां नी हुंदे कम्म खराब इसे ज्यादा भुखे करी दिति दुनियां बर्बाद जितना जे भगवाने दितिरा जे तितने च करो गुज़ारा तां जिंदगी सुधरी जाणी कने जियुणे रा औणा नज़ारा

# भारतस्य सौर ऊर्जा उत्पादनस्य प्रतिरूपं विश्वे सर्वाधिकं सफलम्- ऊर्जामन्त्री प्रह्लाद जोशी

हिमसंस्कृतवार्ताः-
नवीनं नवीकरणीयं च ऊर्जामन्त्री प्रह्लाद जोशी अद्य उक्तवान् यत् भारतस्य सौर ऊर्जा उत्पादनस्य प्रतिरूपं विश्वे सर्वाधिकं सफलम् अस्ति। नवदेहलीनगरे अन्तर्राष्ट्रीय- सौरगठबन्धन- शिखरसम्मेलने मीडियासमीपं वदन् जोशीमहोदयः अवदत् यत् प्रधानमंत्री सूर्यगृहयोजनायाः अन्तर्गतं छदेः उपरि २१ लक्षं सौर-एककानि स्थापितानि सन्ति, प्रायः ५० प्रतिशतं जनाः च शून्यं विद्युत्बिलं प्राप्तवन्तः। केन्द्रीयमन्त्री उक्तवान् यत् प्रधानमंत्री कुसुम योजनायाः अन्तर्गतं कृषकाः सौर ऊर्जायाः उत्पादनं विक्रयं च कुर्वन्ति। जोशीमहोदयः अवदत् यत् भारतं सौरगठबन्धनशिखरसम्मेलने सदस्यदेशैः सह स्वस्य अनुभवान् सहभागं कुर्वन् अस्ति। सः अवदत् यत् सदस्यदेशाः वैश्विक- सौरऊर्जा- उत्पादनस्य प्रायः ४० प्रतिशतं योगदानं ददति। सौरगठबन्धनस्य महानिदेशकः आशीषखन्ना अखिलभारतीयरेडियो न्यूज इत्यस्मै अवदत् यत् अस्मिन् सौरगठबन्धनशिखरसम्मेलने १२५ देशानां ५० तः अधिकानां संस्थानां च मन्त्रिणः प्रतिनिधिश्च भागं गृह्णन्ति। सः अवदत् यत् द्विदिनात्मके सत्रे लघुद्वीपराज्यैः संयुक्तक्रयणं, एकसूर्यस्य, एकविश्वस्य, एकजालस्य च कार्यक्रमस्य अन्तर्गतं सर्वे देशाः कथं कार्यं करिष्यन्ति, पुनःप्रयोगस्य मानकानां विकासः कथं भविष्यति इति विषयेषु चर्चा भविष्यति।

समञ्जन्तु विश्वेदेवा समापो हृदयाणि नौ।।
**हिमाचल-संस्कृत-अकादम्याः**
पूर्वसचिवस्य डॉ केशवानंदकौशलवर्यस्य सुपुत्र्याः ज्योत्स्ना इत्यस्याः आदर्शः इत्यनेन सह मंगलमय-परिणयसूत्रोपलक्ष्ये
हिमसंस्कृतवार्तापरिवारपक्षतः हार्दाः शुभकामनाः

